# संस्कृत-वार्ता:

**दिनाङ्क :- 15 .03.2024**

**प्रात: - 06:55**

## प्रधानमन्त्री/केरल प्रदेश

प्रधानमन्त्री नरेन्द्रमोदी अद्य केरलप्रदेशे पथानामथिट्टा जनपदे लोकसभा निर्वाचन प्रचार-कार्यक्रमे भागं ग्रहीष्यति। प्रधानमन्त्री श्रीनरेन्द्रमोदी तत्र एनडीए ग्रन्थियुतदलस्य प्रत्यादर्शन: अनिल एंटनी इत्येतस्य पक्षे निर्वाचनसभां सम्बोधयिष्यति। प्रधानमन्त्री श्रीनरेन्द्रमोदी पथानामथिट्टा-जनपदस्य जनपदप्रांगणे सार्वजनिक-उपवेशन कार्यक्रमे अपि भागं भजिष्यति। प्रधानमन्त्रिण: इत्येतां यात्रां निध्याय जनपदे सुरक्षा-व्यवस्था सुदृढीकृता।

## प्रधानमन्त्री-स्वनिधियोजना

प्रधानमन्त्री श्री नरेन्द्रमोदी गतदिने नवदेहल्या: जवाहरलाल-नेहरू-प्रांगणे प्रधानमन्त्रि-स्वनिधि-लाभार्थिन: प्रधानमन्त्री समुदीरितवान् यत् स्वनिधि-योजना मार्ग-वीथि-विक्रेतृभ्य: जीवनरेखारूपेण सिद्धा जाता। गतदिने प्रधानमन्त्री स्वनिधि योजनाया: लाभार्थिभ्या ऋणं वितरितवान्। तत्र श्रीमोदी प्रोक्तवान् यत् कोविड-काले मार्ग-वीथि-विक्रेतृणां साहस: अद्भुत: आसीत्। समाजे योगदानाय तेभ्य वर्धाजनमपि प्रधानमन्त्री एकाशितवान्।

## वातीन्धन-मूल्यानि

वातीन्धन-वितरण-समवायै: पेट्रोल-डीजल इति वातीन्धन मूल्येषु न्यूनताया: घोषणा कृता। अशेषे हि देशे मूल्येषु द्विरूप्यात्मिकी न्यूनता संजाता। नवमूल्यात्मिकी वितरण-क्रिया अद्य प्रभृप्ति प्रात: षट्वादनत: प्रवर्तयिष्यते। प्राकृतिक-वातीन्धन-मन्त्रालयेन संचारपटले प्रकाशितायां सूचनायां समुद् घोषिता यत् एतेन उपभोक्तृ-व्यय: वर्धयिष्यते।

## रूसदेश:-निर्वाचनम्

रूसदेशे राष्ट्रपति-निर्वाचनाय मतदान प्रक्रिया अद्य प्रारम्भा भविष्यति। निर्वाचनं निहयाय तत्र सर्वा: संजा: सम्पूरिता:। मतदानम् अद्यप्रभृति समारभ्य मासस्यास्य सप्तदश दिनांकं यावत् अर्थात दिनत्रय यावत् प्रचलिष्यति। रूसदेशे राष्ट्रपति निर्वाचनं न केवलं रूसदेशाय अपितु सम्पूर्णविश्वाय अपि महत्वपूर्णं वर्तते। एतत् प्रथमं वारं यत् रूसदेशे निर्वाचन प्रक्रियायाम् अन्तर्जालीय विकलपस्य उपयोगो भविष्यति।

## अमित शाह-सीएए:

केन्द्रीयगृहमन्त्री अमितशाहः नगरिकता-संशोधन-अधिनियमं पुनरुच्चारितवान् प्रोक्तवान् च यत् (सीएए) इति नगरिकता-संशोधन-अधिनियमः नागरिकतायाः अधिकारं यच्छति अनेन कस्यापि नागरिकता नाधिग्रहीष्यते । एकस्मिन् समाचारपटले प्रदत्ते साक्षात्कारे श्री-शाहः प्रोक्तवान् यत्, नगरिकता-संशोधन-अधिनियमः अफगानिस्तान, बांग्लादेश ,पाकिस्तान-देशेभ्यः समागतेभ्यः हिंदू-बौद्ध-जैन-सिख-ईसाई-पारसी-शरणार्थिभ्यः अधिकारं नागरिकतां च प्रदास्यति । सः प्रोक्तवान् यत् नगरिकता-संशोधन-अधिनियमान्तर्गतं सर्वेभ्यः समानाधिकाराः प्रदास्यन्ते यतोऽहि ते अद्य भारतीयनागरिकाः भविष्यन्ति ।

## बैडमिन्टन

ऑल-इंग्लैंड-ओपन-बैडमिन्टन-प्रतिस्पर्धायां पुरूषैकलवर्गे विश्वस्य तृतीयवरीयता प्राप्तं 'एंडर्स एंटोनसेन' इत्यमुं पराभूय भारतीय: क्रीडक: लक्ष्यसेन: प्रागुपान्त्यचक्रं प्राविशत्। लक्ष्यसेन: 'एंटोनसेन' इत्यमुं चतुश्चत्वारिंशत्-द्वाविंशत्, एकादश-एकविंशति:, एकविंशति:-चर्तुदश-इत्यन्तरालै: पराजितवान्। अपरत्र महिला-एकलवर्गे पीवी सिन्धु: द्वितीयचरणे पराजिता, येन तस्या: प्रतिस्पर्धा-यात्रा एषा समाप्ता जाता। विश्वस्य शीर्षांक धारिता कोरियादेशीया 'एनसेयंग:' इत्येषा पीवी सिन्धुं एकोनविंशति:-एकादश, एकादश-एकविंशति: इत्यन्तरालै: पराजितवती।

अपरत्र पुरूषयुगले चिरागशेट्टी-सात्विक साईराज इत्यनयो: युगलदलं पराजितवत्। अद्य सायंकाले अन्ये प्रागुपान्त्य द्वन्द्वे अश्विनी पोनप्पा-तनीषा क्रैस्टो-इति युगल दलमपि पराजितवत्।

**।। इति वार्ता: ।।**